कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

॥अथ सप्तम काण्डे चतुर्थः प्रश्नः॥

हरिः ओम्॥ बृहस्पतिरकामयत श्रन्मे देवा दधीरन्गच्छेयं पुरोधामिति स एतं चतुर्विग्ंशतिरात्रमपश्यत्तमाऽहरत्तेनाऽयजत ततो वै तस्मै श्रद्देवा अदधताऽगच्छत्पुरोधां य एवं विद्वाग्ंसश्चतुर्विग्ंशतिरात्रमासते श्रदेभ्यो मनुष्या दधते गच्छन्ति पुरोधां ज्योतिर्गौरायुरिति त्र्यहा भवन्तीयं वाव ज्योतिरन्तरिक्षं गौरसावायु- [१] रिमानेव लोकानभ्यारोहन्त्यभिपूर्वं त्र्यहा भवन्त्यभिपूर्वमेव सुवर्गँल्लोकमभ्यारोहन्त्यसन्नं वा एतद्यदच्छन्दोमं यच्छन्दोमा भवन्ति तेन सन्नं देवता एव पृष्ठैरव रुन्धते पशूङ्छन्दोमैरोजो वै वीर्यं पृष्ठानि पशवश्छन्दोमा ओजस्येव वीर्ये पशुषु प्रति तिष्ठन्ति बृहद्रथंतराभ्यां यन्तीयं वाव रथंतरमसौ बृहदाभ्यामेव [२] यन्त्यथो अनयोरेव प्रति तिष्ठन्त्येते वै यज्ञस्याऽञ्ज्जसायनी स्रुती ताभ्यामेव सुवर्गँल्लोकं यन्ति चतुर्विग्ंशतिरात्रो भवति चतुर्विग्ंशतिरर्धमासाः संवथ्सरः संवथ्सरः सुवर्गो लोकः संवथ्सर एव सुवर्गे लोके प्रति तिष्ठन्त्यथो चतुर्विग्ंशत्यक्षरा गायत्री गायत्री ब्रह्मवर्चसङ्गायत्रियैव ब्रह्मवर्चसमव रुन्धतेऽतिरात्रावभितो भवतो ब्रह्मवर्चसस्य परिगृहीत्यै॥[३]

असावायुराभ्यामेव पञ्चचत्वारिग्ंशच्च॥7.4.1॥

यथा वै मनुष्या एवं देवा अग्र आसन्तेऽकामयन्ताऽवर्तिं पाप्मानं मृत्युमपहत्य दैवीग्ं

सग्ं सदङ्गच्छेमेति त एतञ्चतुर्विग्ंशतिरात्रमपश्यन्तमाऽहरन्तेनाऽयजन्त ततो वै तेऽवर्तिं पाप्मानं मृत्युमपहत्य दैवीग्ं सग्ं सदमगच्छन् य एवं विद्वाग्ंसश्चतुर्विग्ंशतिरात्रमासतेऽवर्तिमेव पाप्मानमपहत्य श्रियङ्गच्छन्ति श्रीर्हि मनुष्यस्य [४] दैवी सग्ंसज्ज्योतिरतिरात्रो भवति सुवर्गस्य लोकस्याऽनुख्यात्यै पृष्ठ्यः षडहो भवति षड्वा ऋतवः संवथ्सरस्तं मासा अर्धमासा ऋतवः प्रविश्य दैवीग्ं सग्ंसदमगच्छन् य एवं विद्वाग्ंसश्चतुर्विग्ंशतिरात्रमासते संवथ्सरमेव प्रविश्य वस्यसीग्ं सग्ंसदं गच्छन्ति त्रयस्त्रयस्त्रिग्ंशा अवस्ताद्भवन्ति त्रयस्त्रयस्त्रिग्ंशाः परस्तात्त्रयस्त्रिग्ंशैरेवोभवयतोऽवर्तिं पाप्मानमपहत्य दैवीग्ं सग्ंसदं मध्यतो [५] गच्छन्ति पृष्ठानि हि दैवी सग्ंसज्जामि वा एतत्कुर्वन्ति यत्त्रयस्त्रयस्त्रिग्ंशा अन्वञ्चो मध्येऽनिरुक्तो भवति तेनाऽजाम्यूर्ध्वानि पृष्ठानि भवन्त्यूर्ध्वाश्छन्दोमा उभाभ्याग्ं रूपाभ्याग्ं सुवर्गँल्लोकं यन्त्यसत्रं वा एतद्यदच्छन्दोमं यच्छन्दोमा भवन्ति तेन सत्रं देवता एव पृष्ठैरव रुन्धते पशूङ्छन्दोमैरोजो वै वीर्यं पृष्ठानि पशव- [६] श्छन्दोमा ओजस्येव वीर्ये पशुषु प्रति तिष्ठन्ति त्रयस्त्रयस्त्रिग्ंशा अवस्ताद्भवन्ति त्रयस्त्रयस्त्रिग्ंशाः परस्तान्मध्ये पृष्ठान्युरो वै त्रयस्त्रिग्ंशा आत्मा पृष्ठान्यात्मन एव तद्यजमानाः शर्म नह्यन्तेऽनार्त्यै बृहद्रथंतराभ्यां यन्तीयं वाव रथंतरमसौ बृहदाभ्यामेव यन्त्यथो अनयोरेव प्रति तिष्ठन्त्येते वै यज्ञस्याऽञ्जसायनी स्रुती ताभ्यामेव [७] सुवर्गँल्लोकं यन्ति पराञ्चो वा एते सुवर्गँल्लोकमभ्यारोहन्ति ये पराचीनानि पृष्ठान्युपयन्ति प्रत्यङ्षडहो भवति प्रत्यवरूढ्या अथो प्रतिष्ठित्या उभयोर्लोकयोर्ऋद्ध्वोत्तिष्ठन्ति त्रिवृतोऽधि त्रिवृतमुप यन्ति स्तोमानाग्ं सं पत्त्यै प्रभवाय ज्योतिरग्निष्टोमो भवत्ययं वाव स क्षयोऽस्मादेव

तेन क्षयान्न यन्ति चतुर्विग्ं शतिरात्रो भवति चतुर्विग्ंशतिरर्धमासाः संवथ्सरः संवथ्सरः सुवर्गो लोकः संवथ्सर एव सुवर्गे लोके प्रति तिष्ठन्त्यथो चतुविग्ं शत्यक्षरा गायत्री गायत्री ब्रह्मवर्चसङ्गायत्रियैव ब्रह्मवर्चसमव रुन्धते ऽतिरात्रावभितो भवतो ब्रह्मवर्चसस्य परिगृहीत्यै॥[८]

मनुष्यस्य मध्यतः पशवस्ताभ्यामेव संवथ्सरश्चतुर्विग्ंशतिश्च॥7.4.2॥

ऋक्षा वा इयमलोमकाऽऽसीथ्साऽकामयतौषधीभिर्वनस्पतिभिः प्र जायेयेति सैतास्त्रिग्ंशतग्ं रात्रीरपश्यत्ततो वा इयमोषधीभिर्वनस्पतिभिः प्राऽजायत ये प्रजाकामाः पशुकामाः स्युस्त एता आसीरन्प्रैव जायन्ते प्रजया पशुभिरियं वा अक्षुध्यथ्सैतां विराजमपश्यत्तामात्मन्धित्वाऽन्नाद्यमवाऽरुन्धौषधी- [९] र्वनस्पतीन्प्रजां पशून्तेनाऽवर्धत सा जेमानं महिमानमगच्छद्य एवं विद्वाग्ंस एता आसते विराजमेवाऽऽत्मन्धित्वाऽन्नाद्यमव रुन्धते वर्धन्ते प्रजया पशुभिर्जेमानं महिमानङ्गच्छन्ति ज्योतिरतिरात्रो भवति सुवर्गस्य लोकस्याऽनुख्यात्यै पृष्ठ्यः षडहो भवति षड्वा ऋतवः षट्पृष्ठानि पृष्ठैरेवर्तूनन्वारोहन्त्यृतुभिः संवथ्सरं ते संवथ्सर एव [१०] प्रति तिष्ठन्ति त्रयस्त्रिग्ंशात्त्रयस्त्रिग्ंशमुप यन्ति यज्ञस्य संतत्या अथो प्रजापतिर्वै त्रयस्त्रिग्ंशः प्रजापतिमेवाऽऽरभन्ते प्रतिष्ठित्यै त्रिणवो भवति विजित्या एकविग्ंशो भवति प्रतिष्ठित्या अथो रुचमेवाऽऽत्मन्दधते त्रिवृदग्निष्टुद्भवति पाप्मानमेव तेन निर्दहन्तेऽथो तेजो वै त्रिवृत्तेज एवाऽऽत्मन्दधते पञ्चदश इन्द्रस्तोमो भवतीन्द्रयमेवाऽव [११] रुन्धते सप्तदशो भवत्यन्नाद्यस्याऽवरुद्ध्या अथो प्रैव तेन जायन्त एकविग्ंशो भवति प्रतिष्ठित्या अथो रुचमेवाऽऽत्मन्दधते चतुर्विग्ंशो भवति

चतुर्विग्ंशतिरर्धमासाः संवथ्सरः संवथ्सरः सुवर्गो लोकः संवथ्सर एव सुवर्गे लोके प्रति तिष्ठन्त्यथो एष वै विषूवान् विषूवन्तो भवन्ति य एवं विद्वाग्ंस एता आसते चतुविग्ंशात्पृष्ठान्युप यन्ति संवथ्सर एव प्रतिष्ठाय [१२] देवता अभ्यारोहन्ति त्रयस्त्रिग्ंशात्त्रयस्त्रिग्ंशमुप यन्ति त्रयस्त्रिग्ंशद्वै देवता देवतास्वेव प्रति तिष्ठन्ति त्रिणवो भवतीमे वै लोकास्त्रिणव एष्वेव लोकेषु प्रति तिष्ठन्ति द्वावेकविग्ंशौ भवतः प्रतिष्ठित्या अथो रुचमेवाऽऽत्मन्दधते बहवः षोडशिनो भवन्ति तस्माद्बहवः प्रजासु वृषाणो यदेते स्तोमा व्यतिषक्ता भवन्ति तस्मादियमोषधीभिर्वनस्पतिभिर्व्यतिषक्ता [१३] व्यतिषज्यन्ते प्रजया पशुभिर्य एवं विद्वाग्ंस एता आसतेऽक्लुप्ता वा एते सुवर्गँल्लोकं यन्त्युच्चावचान् हि स्तोमानुपयन्ति यदेत ऊर्ध्वाः क्लुप्ताः स्तोमा भवन्ति क्लुप्ता एव सुवर्गँल्लोकं यन्त्युभयोरेभ्यो लोकयोः कल्पते त्रिग्ंशदेतास्त्रिग्ंशदक्षरा विराडन्नं विराड्विराजैवाऽन्नाद्यमव रुन्धतेऽतिरात्रावभितो भवतोऽन्नाद्यस्य परिगृहीत्यै॥[१४]

*ओषधीस्संवथ्सर एवाऽव प्रतिष्ठाय व्यतिषक्तैकान्न पञ्चाशच्च॥**7.4.3***॥

प्रजापतिः सुवर्गँल्लोकमैत्तं देवा येनयेन छन्दसाऽनु प्राऽयुञ्जत तेन नाऽऽप्नुवन्त एता द्वात्रिग्ंशतग्ं रात्रीरपश्यन्द्वात्रिग्ंशदक्षराऽनुष्टुगानुष्टुभः प्रजापतिः स्वेनैव छन्दसा प्रजापतिमाप्त्वाऽभ्यारुह्य सुवर्गं लोकमायन् य एवं विद्वाग्ंस एता आसते द्वात्रिग्ंशदेता द्वात्रिग्ंशदक्षराऽनुष्टुगानुष्टुभः प्रजापतिः स्वेनैव छन्दसा प्रजापतिमाप्त्वा श्रियङ्गच्छन्ति [१५] श्रीर्हि मनुष्यस्य सुवर्गो लोको द्वात्रिग्ंशदेता द्वात्रिग्ंशदक्षरानुष्टुग्वागनुष्टुप्सर्वामेव वाचमाप्नुवन्ति सर्वे वाचो वदितारो भवन्ति

सर्वे हि श्रियं गच्छन्ति ज्योतिर्गौरायुरिति त्र्यहा भवन्तीयं वाव ज्योतिरन्तरिक्षं गौरसावायुरिमानेव लोकानभ्यारोहन्त्यभिपूर्वं त्र्यहा भवन्त्यभिपूर्वमेव सुवर्गँल्लोकमभ्यारोहन्ति बृहद्रथंतराभ्यां यन्तीयं [१६] वाव रथंतरमसौ बृहदाभ्यामेव यन्त्यथो अनयोरेव प्रति तिष्ठन्त्येते वै यज्ञस्याऽञ्जसायनी स्रुती ताभ्यामेव सुवर्गँल्लोकं यन्ति पराञ्चो वा एते सुवर्गँल्लोकमभ्यारोहन्ति ये पराचस्त्र्यहानुपयन्ति प्रत्यङ्त्र्यहो भवति प्रत्यवरूढ्या अथो प्रतिष्ठित्या उभयोर्लोकयोर्ऋद्ध्वोत्तिष्ठन्ति द्वात्रिग्ंशदेतास्तासां यास्त्रिग्ंशत्त्रिग्ंशदक्षरा विराडन्नं विराड्विराजैवान्नाद्यमव रुन्धते ये द्वे अहोरात्रे एव ते उभाभ्याग्ं रूपाभ्याग्ं सुवर्गं लोकं यन्त्यतिरात्रावभितो भवतः परिगृहीत्यै॥[१७]

*गच्छन्ति यन्ति त्रिग्ंशदक्षरा द्वाविग्ंशतिश्च॥**7.4.4***॥

द्वे वाव देवसत्रे द्वादशाहश्चैव त्रयस्त्रिग्ंशदहश्च य एवं विद्वाग्ंसस्त्रयस्त्रिग्ंशदहमासते साक्षादेव देवता अभ्यारोहन्ति यथा खलु वै श्रेयानभ्यारूढः कामयते तथा करोति यद्यवविध्यति पापीयान्भवति यदि नाऽवविध्यति सदृङ्य एवं विद्वाग्ंसस्त्रयस्त्रिग्ंशदहमासते वि पाप्मना भ्रातृव्येणाऽऽ वर्तन्तेऽहर्भाजो वा एता देवा अग्र आऽहर- [१८] न्नहरेकोऽभजताऽहरेकस्ताभिर्वै ते प्रबाहुगार्ध्नुवन् य एवं विद्वाग्ंसस्त्रयस्त्रिग्ंशदहमासते सर्व एव प्रबाहुगृध्नुवन्ति सर्वे ग्रामणीयं प्राऽऽप्नुवन्ति पञ्चाहा भवन्ति पञ्च वा ऋतवः संवथ्सर ऋतुष्वेव संवथ्सरे प्रति तिष्ठन्त्यथो पञ्चाक्षरा पङ्क्तिः पाङ्क्तो यज्ञो यज्ञमेवाऽव रुन्धते त्रीण्याश्विनानि भवन्ति त्रय इमे लोका ए- [१९] ष्वेव लोकेषु प्रति तिष्ठन्त्यथो त्रीणि

वै यज्ञस्येन्द्रियाणि तान्येवाऽव रुन्धते विश्वजिद्भवत्यन्नाद्यस्याऽवरुद्ध्यै सर्वपृष्ठो भवति सर्वस्याऽभिजित्यै वाग्वै द्वादशाहो यत्पुरस्ताद्द्वादशाहमुपेयुरनाप्तां वाचमुपेयुरुपदासुकैषां वाक्स्यादुपरिष्टाद्द्वादशाहमुप यन्त्याप्तामेव वाचमुप यन्ति तस्मादुपरिष्टाद्वाचा वदामोऽवान्तरं [२०] वै दशरात्रेण प्रजापतिः प्रजा असृजत यद्दशरात्रो भवति प्रजा एव तद्यजमानाः सृजन्त एताग्ं ह वा उदङ्कः शौल्बायनः सत्रस्यर्धिमुवाच यद्दशरात्रो यद्दशरात्रो भवति सत्त्रस्यरद्ध्यै अथो यदेव पूर्वेष्वहःसु विलोम क्रियते तस्यैवैषा शान्तिद्वर्यनीका वा एता रात्रयो यजमाना विश्वजिथ्सहाऽतिरात्रेण पूर्वाः षोडश सहाऽतिरात्रेणोत्तराः षोडश य एवं विद्वाग्ंसस्त्रयस्त्रिग्ंशदहमासत ऐषां द्व्यनीका प्रजा जायतेऽतिरात्रावभितो भवतः परिगृहीत्यै॥[२१]

अहरनेष्ववान्तरग्ं षोडश सह सप्तदश च॥7.4.5॥

आदित्या अकामयन्त सुवर्गँल्लोकमियामेति ते सुवर्गँल्लोकन्न प्राऽजानन्न सुवर्गँल्लोकमायन्त एतग्ं षट्त्रिग्ंशद्रात्रमपश्यन्तमाऽहरनन्तेनाऽयजन्त ततो वै ते सुवर्गँल्लोकं प्राऽजानन्थ्सुवर्गं लोकमायन् य एवं विद्वाग्ंसः षट्त्रिग्ंशद्रात्रमासते सुवर्गमेव लोकं प्र जानन्ति सुवर्गँल्लोकं यन्ति ज्योतिरतिरात्रो [२२] भवति ज्योतिरेव पुरस्ताद्दधते सुवर्गस्य लोकस्याऽनुख्यात्यै षडहा भवन्ति षड्वा ऋतव ऋतुष्वेव प्रति तिष्ठन्ति चत्वारो भवन्ति चतस्रो दिशो दिक्ष्वेव प्रति तिष्ठन्त्यसत्रं वा एतद्यदच्छन्दोमं यच्छन्दोमा भवन्ति तेन सत्रं देवता एव पृष्ठैरव रुन्धते पशूङ्छन्दोमैरोजो वै वीर्यं पृष्ठानि पशवश्छन्दोमा ओजस्येव [२३] वीर्ये पशुषु प्रति

तिष्ठन्ति षट्त्रिग्ंशद्रात्रो भवति षट्त्रग्ंशदक्षरा बृहती बार्हताः पशवो बृहत्यैव पशूनव रुन्धते बृहती छन्दसाग्ं स्वाराज्यमाश्नुताऽश्नुवते स्वाराज्यं य एवं विद्वाग्ंसः षट्त्रिग्ंशद्रात्रमासते सुवर्गमेव लोकं यन्त्यतिरात्रावभितो भवतः सुवर्गस्य लोकस्य परिगृहीत्यै॥[२४]

अतिरात्र ओजस्येव षट्त्रिग्ंशच्च||**7.4.6**||

वसिष्ठो हतपुत्रोऽकामयत विन्देय प्रजामभि सौदासान्भवेयमिति स एतमेकस्मान्नपञ्चाशमपश्यत्तमाऽहरत्तेनाऽयजत ततो वै सोऽविन्दत प्रजामभि सौदासानभवद्य एवं विद्वाग्ंस एकस्मान्नपञ्चाशमासते विन्दन्ते प्रजामभि भ्रातृव्यान्भवन्ति त्रयस्त्रिवृतोऽग्निष्टोमा भवन्ति वज्रस्यैव मुखग्ं सग्ग् श्यन्ति दश पञ्चदशा भवन्ति पञ्चदशो वज्रो [२५] वज्रमेव भ्रातृव्येभ्यः प्र हरन्ति षोडशिमद्दशममहर्भवति वज्र एव वीर्यं दधति द्वादश सप्तदशा भवन्त्यन्नाद्यस्याऽवरुद्ध्या अथो प्रैव तैर्जायन्ते पृष्ठ्यः षडहो भवति षड्वा ऋतवः षट्पृष्ठानि पृष्ठैरेवर्तूनन्वारोहन्त्यृतुभिः संवथ्सरं ते संवथ्सर एव प्रति तिष्ठन्ति द्वादशैकविग्ंशा भवन्ति प्रतिष्ठित्या अथो रुचमेवाऽऽत्म- [२६] न्दधते बहवः षोडशिनो भवन्ति विजित्यै षडाश्विनानि भवन्ति षड्वा ऋतव ऋतुष्वेव प्रति तिष्ठन्त्यूनातिरिक्ता वा एता रात्रय ऊनास्तद्यदेकस्यै न पञ्चाशदतिरिक्तास्तद्यद्ध्रूयसीरष्टाचत्वारिग्ंशत ऊनाच्च खलु वा अतिरिक्ताच्च प्रजापतिः प्राऽजायत ये प्रजाकामाः पशुकामाः स्युस्त एता आसीरन्प्रैव जायन्ते प्रजया पशुभिर्वैराजो वा एष यज्ञो यदेकस्मान्नपञ्चाशो य एवं विद्वाग्ंस

एकस्मान्नपञ्चाशमासते विराजमेव गच्छन्त्यन्नादा भवन्त्यतिरात्रावभितो भवतोऽन्नाद्यस्य परिगृहीत्यै॥[२७]

वज्र आत्मन्प्रजया द्वाविग्ंशतिश्च॥7.4.7॥

संवथ्सराय दीक्षिष्यमाणा एकाष्टकायां दीक्षेरन्नेषा वै संवथ्सरस्य पत्नी यदेकाष्टकैतस्यां वा एष एताग्ं रात्रिं वसति साक्षादेव संवथ्सरमारभ्य दीक्षन्त आर्तं वा एते संवथ्सरस्याऽभि दीक्षन्ते य एकाष्टकायां दीक्षन्तेऽन्तनामानावृतू भवतो व्यस्तं वा एते संवथ्सरस्याऽभि दीक्षन्ते य एकाष्टकायान्दीक्षन्तेऽन्तनामानावृतू भवतः फल्गुनीपूर्णमासे दीक्षेरन्मुखं वा एत- [२८] थ्संवथ्सरस्य यत्फल्गुनीपूर्णमासो मुखत एव संवथ्सरमारभ्य दीक्षन्ते तस्यैकैव निर्या यथ्सां मेघ्ये विषूवान्थ्सं पद्यते चित्रापूर्णमासे दीक्षेरन्मुखं वा एतथ्संवथ्सरस्य यच्चित्रापूर्णमासो मुखत एव संवथ्सरमारभ्य दीक्षन्ते तस्य न का चन निर्या भवति चतुरहे पुरस्तात्पौर्णमास्यै दीक्षेरन्तेषामेकाष्टकायां क्रयः सं पद्यते तेनैकाष्टकां न च्छम्बट्कुर्वन्ति तेषां [२९] पूर्वपक्षे सुत्या सं पद्यते पूर्वपक्षं मासा अभि सं पद्यन्ते ते पूर्वपक्ष उत्तिष्ठन्ति तानुत्तिष्ठत ओषधयो वनस्पतयोऽनूत्तिष्ठन्ति तान्कल्याणी कीर्तिरनूत्तिष्ठत्यराथ्सुरिमे यजमाना इति तदनु सर्वे राध्नुवन्ति॥[३०]

एतच्छंबट्कुर्वन्ति तेषाञ्चतुस्त्रिग्ंशच्च॥7.4.8॥

सुवर्गं वा एते लोकं यन्ति ये सत्रमुपयन्त्यभीन्धत एव दीक्षाभिरात्मानग्ग् श्रपयन्त उपसद्भिर्द्वाभ्यां लोमाव द्यन्ति द्वाभ्यां त्वचं द्वाभ्यामसृद्द्वाभ्यां मागंसं द्वाभ्यामस्थि

द्वाभ्यां मज्जानमात्मदक्षिणं वै सत्रमात्मानमेव दक्षिणां नीत्वा सुवर्गं लोकं यन्ति शिखामनु प्र वपन्त ऋद्ध्या अथो रघीयाग्ंसः सुवर्गं लोकमयामेति॥[३१]

सुवर्गं पञ्चाशत्॥7.4.9॥

ब्रह्मवादिनो वदन्त्यतिरात्रः परमो यज्ञक्रतूनां कस्मात्तं प्रथममुप यन्तीत्येतद्वा अग्निष्टोमं प्रथममुप यन्त्यथोक्थ्यमथ षोडशिनमथाऽतिरात्रमनुपूर्वमेवैतद्यज्ञक्रतूनुपेत्य तानालभ्य परिगृह्य सोममेवैतत्पिबन्त आसते ज्योतिष्टोमं प्रथममुप यन्ति ज्योतिष्टोमो वै स्तोमानां मुखं मुखत एव स्तोमान्प्र युञ्जते ते [३२] सग्ग्स्तुता विराजमभि सं पद्यन्ते द्वे चर्चावति रिच्येते एकया गौरतिरिक्त एकयाऽऽयुरूनः सुवर्गो वै लोको ज्योतिरूर्ग्विराट्थ्सुवर्गमेव तेन लोकं यन्ति रथंतरं दिवा भवति रथंतरं नक्तमित्याहुर्ब्रह्मवादिनः केन तदजामीति सौभरं तृतीयसवने ब्रह्मसामम्बृहत्तन्मध्यतो दधति विधृत्यै तेनाऽजामि॥[३३]

त एकान्न पञ्चाशच्च॥7.4.10॥

ज्योतिष्टोमं प्रथममुप यन्त्यस्मिन्नेव तेन लोके प्रति तिष्ठन्ति गोष्टोमं द्वितीयमुप यन्त्यन्तरिक्ष एव तेन प्रति तिष्ठन्त्यायुष्टोमं तृतीयमुप यन्यमुष्मिन्नेव तेन लोके प्रति तिष्ठन्तीयं वाव ज्योतिरन्तरिक्षं गौरसावायुर्यदेतान्थ्स्तोमानुपयन्त्येष्वेव तल्लोकेषु सत्रिणः प्रतितिष्ठन्तो यन्ति ते सग्ग्स्तुता विराज- [३४] मभि सं पद्यन्ते द्वे चर्चावति रिच्येते एकयागौरतिरिक्त एकयाऽऽयुरूनः सुवर्गो वै लोको ज्योतिरूर्ग्विराडूर्जमेवाऽव रुन्धते ते न क्षुधाऽऽर्तिमार्छन्त्यक्षोधुका भवन्ति क्षुथ्सम्बाधा इव हि

सत्रिणोऽग्निष्टोमावभितः प्रधी तावुक्थ्या मध्ये नभ्यं तत्तदेतत्परियद्देवचक्रं यदेतेन [३५] षडहेन यन्ति देवचक्रमेव समारोहन्त्यरिष्ट्यै ते स्वस्ति समश्नुवते षडहेन यन्ति षड्वा ऋतव ऋतुष्वेव प्रति तिष्ठन्त्युभयतो ज्योतिषा यन्त्युभयत एव सुवर्गे लोके प्रतितिष्ठन्तो यन्ति द्वौ षडहौ भवतस्तानि द्वादशाऽहानि सं पद्यन्ते द्वादशो वै पुरुषो द्वे सक्थ्यौ द्वौ बाहू आत्मा च शिरश्च चत्वार्यङ्गानि स्तनौ द्वादशौ [३६] तत्पुरुषमनु पर्यावर्तन्ते त्रयः षडहा भवन्ति तान्यष्टादशाऽहानि सं पद्यन्ते नवाऽन्यानि नवाऽन्यानि नव वै पुरुषे प्राणास्तत्प्राणाननु पर्यावर्तन्ते चत्वारः षडहा भवन्ति तानि चतुर्विग्ंशतिरहानि सं पद्यन्ते चतुर्विग्ंशतिरर्धमासाः संवथ्सरस्तथ्संवथ्सरमनु पर्यावर्तन्तेऽप्रतिष्ठितः संवथ्सर इति खलु वा आहुर्वर्षीयान्प्रतिष्ठाया इत्येतावद्वै संवथ्सरस्य ब्राह्मणं यावन्मासो मासिमास्येव प्रतितिष्ठन्तो यन्ति॥[३७]

विराजमेतेन द्वादशावेतावद्वा अष्टौ च||**7.4.11**||

मेषस्त्वा पचतैरवतु लोहितग्रीवश्छागैः शल्मलिर्वृद्ध्या पर्णो ब्रह्मणा प्लक्षो मेधेन न्यग्रोधश्चमसैरुदुम्बर ऊर्जा गायत्री छन्दोभिस्त्रिवृथ्स्तोमैरवन्तीः स्थाऽवन्तीस्त्वाऽवन्तु प्रियं त्वा प्रियाणां वर्षिष्ठमाप्यानां निधीनां त्वा निधिपतिग्ं हवामहे वसो मम॥[३८]

मेषष्षट्रिग्ंशत्||**7.4.12**||

कूप्याभ्यः स्वाहा कूल्याभ्यः स्वाहा विकर्याभ्यः स्वाहाऽवट्याभ्यः स्वाहा खन्याभ्यः स्वाहा ह्रद्याभ्यः स्वाहा सूद्याभ्यः स्वाहा सरस्याभ्यः स्वाहा वैशन्तीभ्यः स्वाहा पल्वल्याभ्यः स्वाहा वर्ष्याभ्यः स्वाहाऽवर्ष्याभ्यः स्वाहा ह्रादुनीभ्यः स्वाहा

पृष्वाभ्यः स्वाहा स्यन्दमानाभ्यः स्वाहा स्थावराभ्यः स्वाहा नादेयीभ्यः स्वाहा सैन्धवीभ्यः स्वाहा समुद्रियाभ्यः स्वाहा सर्वाभ्यः स्वाहा॥[३९]

कूप्याभ्यश्चत्वारिग्ंशत्॥7.4.13॥

अद्भ्यः स्वाहा वहन्तीभ्यः स्वाहा परिवहन्तीभ्यः स्वाहा समन्तं वहन्तीभ्यः स्वाहा शीघ्रं वहन्तीभ्यः स्वाहा शीभं वहन्तीभ्यः स्वाहोग्रं वहन्तीभ्यः स्वाहा भीमं वहन्तीभ्यः स्वाहाऽम्भोभ्यः स्वाहा नभोभ्यः स्वाहा महोभ्यः स्वाहा सर्वस्मै स्वाहा॥[४०]

अध्य एकान्न त्रिग्ंशत्॥7.4.14॥

यो अर्वन्तं जिघाग्ंसति तमभ्यमीति वरुणः। परो मर्तः परः श्वा॥ अहं च त्वं च वृत्रहन्थ्सम्बभूव सनिभ्य आ। अरातीवा चिददिवोऽनु नौ शूर मग्ंसतै भद्रा इन्द्रस्य रातयः॥ अभि क्रत्वेन्द्र भूरध ज्मन्न ते विव्यङ्महिमानग्ं रजाग्ंसि। स्वेना हि वृत्रग्ं शवसा जघन्थ न शत्रुरन्तं विविदद्युधा ते॥[४१]

विविदद्वे च॥7.4.15॥

नमो राज्ञे नमो वरुणाय नमोऽश्वाय नमः प्रजापतये नमोऽधिपतयेऽधिपतिरस्यधिपतिं मा कुर्वधिपतिरहं प्रजानाम्भूयासं मां धेहि मयि धेह्युपाकृताय स्वाहाऽऽलब्धाय स्वाहा हुताय स्वाहा॥[४२]

नम एकान्न त्रिग्ंशत्॥7.4.16॥

मयोभूर्वातो अभि वातूस्रा ऊर्जस्वतीरोषधीरा रिशन्ताम्। पीवस्वतीर्जीवधन्याः पिबन्त्ववसाय पद्वते रुद्र मृड॥ याः सरूपा विरूपा एकरूपा यासामग्निरिष्ट्या नामानि वेद। या अङ्गिरसस्तपसेह चक्रुस्ताभ्यः पर्जन्य महि शर्म यच्छ॥ या देवेषु तनुवमैरयन्त यासाग्ं सोमो विश्वा रूपाणि वेद। ता अस्मभ्यं पयसा पिन्वमानाः प्रजावतीरिन्द्र [४३] गोष्ठे रिरीहि॥ प्रजापतिर्मह्यमेता रराणो विश्वैर्देवैः पितृभिः संविदानः। शिवाः सतीरुप नो गोष्ठमाऽकस्तासां वयं प्रजया सग्ं सदेम॥ इह धृतिः स्वाहेह विधृतिः स्वाहेह रन्तिः स्वाहेह रमतिः स्वाहा महीमू षु सुत्रामाणम्॥[४४]

इन्द्राऽष्टात्रिग्ंशच्च॥7.4.17॥

किग्ग् स्विदासीत्पूर्वचित्तिः किग्ग् स्विदासीद्बृहद्वयः। किग्ग् स्विदासीत्पिशङ्गिला किग्ग् स्विदासीत्पिलिप्पिला॥ द्यौरासीत्पूर्वचित्तिरश्व आसीद्बृहद्वयः। रात्रिरासीत्पिशङ्गिलाऽविरासीत्पिलिप्पिला॥ कः स्विदेकाकी चरति क उ स्विज्जायते पुनः। किग्ग् स्विद्धिमस्य भेषजं किग्ग् स्विदावपनं महत्॥ सूर्य एकाकी चरति [४५] चन्द्रमा जायते पुनः। अग्निर्हिमस्य भेषजम्भूमिरावपनं महत्॥ पृच्छामि त्वा परमन्तं पृथिव्याः पृच्छामि त्वा भुवनस्य नाभिम्। पृच्छामि त्वा वृष्णो अश्वस्य रेतः पृच्छामि वाचः परमं व्योम॥ वेदिमाहुः परमन्तं पृथिव्या यज्ञमाहुर्भुवनस्य नाभिम्। सोममाहुर्वृष्णो अश्वस्य रेतो ब्रह्मैव वाचः परमं व्योम॥[४६]

सूर्य एकाकी चरति षट्चत्वारिग्ंशच्च॥7.4.18॥

अम्बे अम्बाल्यम्बिके न मा नयति कश्चन। स सस्त्यश्वकः॥ सुभगे कां पीलवासिनि सुवर्गे लोके सं प्रोण्वाथाम्। आऽहमजानि गर्भधमा त्वमजासि गर्भधम्। तौ सह चतुरः पदः सं प्र सारयावहै। वृषा वाग्ं रेतोधा रेतो दधातूथ्सक्थ्योर्गृदं धेह्यञ्जिमुदञ्जिं मन्वज। य स्त्रीणां जीवभोजनो य आसां [४७] बिलधावनः। प्रियः स्त्रीणामपीच्यः। य आसाङ्कृष्णे लक्ष्मणि सर्दिगृदिं परावधीत्॥ अम्बे अम्बाल्यम्बिके न मा यभति कश्चन। ससस्त्यश्वकः॥ ऊर्ध्वामेनामुच्छ्रयताद्वेणुभारं गिराविव। अथाऽस्या मध्यमेधताग्ं शीते वाते पुनन्निव॥ अम्बे अम्बाल्यम्बिके न मा यभति कश्चन। ससस्त्यश्वकः॥ यद्धरिणी यवमत्ति न [४८] पुष्टं पशु मन्यते। शूद्रा यदर्यजारा न पोषाय धनायति॥ अम्बे अम्बाल्यम्बिके न मा यभति कश्चन। ससस्त्यश्वकः॥ इयं यका शकुन्तिकाऽऽहलमिति सर्पति। आहतङ्गभे पसो नि जल्गुलीति धाणिका॥ अम्बे अम्बाल्यम्बिके न मा यभति कश्चन। ससस्त्यश्वकः॥ माता च ते पिता च तेऽग्रं वृक्षस्य रोहतः। [४९] प्र सुलामीति ते पिता गभे मुष्टिमतग्ंसयत्॥ दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः। सुरभि नो मुखा करत्प्रण आयुग्ंषि तारिषत्॥ आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन। महे रणाय चक्षसे॥ यो वः शिवतमो रसस्तस्य भाजयतेह नः। उशतीरिव मातरः॥ तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ। आपो जनयथा च नः॥[५०]

*आसामत्ति न रोहतो जिन्वथ चत्वारि च||**7.4.19**||*

भूर्भुवस्सुवर्वसवस्त्वाऽञ्जन्तु गायत्रेण छन्दसा रुद्रास्स्त्वाऽञ्जन्तु त्रैष्टुभेन छन्दसाऽऽदित्यास्त्वाऽञ्जन्तु जागतेन छन्दसा यद्वातो अपो अगमदिन्द्रस्य तनुवं

प्रियाम्। एतग्ग् स्तोतरेतेन पथा पुनरश्वमा वर्तयासि नः॥ लाजी ३ ङ्छाची ३ न् यशो ममाँ ४। यव्यायै गव्याया एतद्देवा अन्नमत्तैतदन्नमद्धि प्रजापते॥ युञ्जन्ति ब्रध्नमरुषं चरन्तं परि तस्थुषः। रोचन्ते रोचना दिवि॥ युञ्जन्त्यस्य काम्या हरी विपक्षसा रथे। शोणा धृष्णू नृवाहसा॥ केतुङ्कृण्वन्नकेतवे पेशो मर्या अपेशसे। समुषद्भिरजायथाः॥[५१]

ब्रध्नं पञ्चविग्ंशतिश्च॥7.4.20॥

प्राणाय स्वाहा व्यानाय स्वाहाऽपानाय स्वाहा स्नावभ्यः स्वाहा संतानेभ्यः स्वाहा परिसंतानेभ्यः स्वाहा पर्वभ्यः स्वाहा संधानेभ्यः स्वाहा शरीरेभ्यः स्वाहा यज्ञाय स्वाहा दक्षिणाभ्यः स्वाहा सुवर्गाय स्वाहा लोकाय स्वाहा सर्वस्मै स्वाहा॥[५२]

प्राणायाऽष्टाविग्ंशतिः॥7.4.21॥

सिताय स्वाहाऽसिताय स्वाहाऽभिहिताय स्वाहाऽनभिहिताय स्वाहा युक्ताय स्वाहाऽयुक्ताय स्वाहा सुयुक्ताय स्वाहोद्युक्ताय स्वाहा विमुक्ताय स्वाहा प्रमुक्ताय स्वाहा वञ्चते स्वाहा परिवञ्चते स्वाहा संवञ्चते स्वाहाऽनुवञ्चते स्वाहोद्वञ्चते स्वाहा यते स्वाहा धावते स्वाहा तिष्ठते स्वाहा सर्वस्मैस्वाहा॥[५३]

सितायाऽष्टात्रिग्ंशत्॥7.4.22॥

बृहस्पतिरश्रद्यथा वा ऋक्षा वै प्रजापतिर्यैनयेन द्वे वाव देवसत्रे आदित्या अकामयन्त सुवर्गं वसिष्ठस्सं वथ्सराय सुवर्गं ये सत्रं ब्रह्मवादिनोऽतिरात्रो ज्योतिष्टोमं मेषः कूप्याभ्योऽद्भ्यो यो नमो मयोभूः किग्ग् स्विदंबे भूः प्राणाय सिताय द्वाविग्ंशतिः॥22॥

बृहस्पतिः प्रति तिष्ठन्ति वै दशरात्रेण सुवर्गं यो अर्वन्तं भूस्त्रिपञ्चाशत्॥५३॥
बृहस्पतिस्सर्वस्मै स्वाहा॥

॥हरिः ओम्॥

॥श्री कृष्णार्पणमस्तु॥

॥इति सप्तम काण्डे चतुर्थः प्रश्नः॥